# ॥ નીલમેઘસ્તુતિઃ ॥

.. Nilamegha Stuti ..

sanskritdocuments.org

August 20, 2017

# .. Nilamegha Stuti ..

# ॥ નીલમેઘસ્તુતિઃ ॥

## Sanskrit Document Information

Text title : nIlameghastutiH

File name : nIlameghastuti.itx

Category : hanumaana

Location : doc_hanumaana

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran psaeaswaran at gmail.com

Source : ParAsharasamhita Hanumachcharitra Vol 1 page 281

Latest update : September 30, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ નીલમેઘસ્તુતિઃ ॥

સચ્ચિદાનન્દરૂપાય સૃષ્ટિસ્થિત્યન્તકારિણે ।
ચરાચરસ્વરૂપાય પુરાણપુરુષાય ચ ॥ ૧॥

નમો લોકશરણ્યાય દીનસંરક્ષણાય ચ ।
ભક્તપાલનરૂપાય આપન્નાર્તિહરાય ચ ॥ ૨॥

ત્વત્પાદદર્શનાદ્દુઃખમશેષં નઃ પ્રણશ્યતુ ।
અનેકજન્મસાહસ્રૈઃ સમ્ભૃતં પુણ્યમસ્તિ મે ॥ ૩॥

નચેત્કથં ત્વદીયાઙ્ઘ્રિદર્શનં સ્યાદહૈતુકમ્ ।
આગામિ શ્રેયસો હેતુર્વર્તમાનાઘશોધકમ્ ।
પૂર્વપુણ્યાર્જિતં કસ્ય નાશાસ્યં તવ દર્શનમ્ ॥ ૪॥

અદ્ય મે સફલં જન્મ ભવત્પાદાબ્જવન્દનાત્ ।
કૃતાર્થાઃ પિતરસ્સર્વે મમ વંશસમુદ્ભવાઃ ॥ ૫॥

ફલિતાઃ ક્રતવો નૂનં વિપ્રાઃ સત્યાશિષોઽભવન્ ।
યથાર્થો જનવાદશ્ચ ચિરાય ભવિતા મમ ॥ ૬॥

અપિ જન્તુર્મહદ્દુઃખી જીવન્ભદ્રાણિ પશ્યતિ ॥ ૭॥

મૈરાવણોઽપિ દુષ્ટાત્મા માતુલો મમ નિર્દયઃ ।
સદ્ગતિં પ્રાપ્નુયાત્સત્યમિતિ મે નિશ્ચિતા મતિઃ ॥ ૮॥

આશ્લિષ્ટસર્વગાત્રોઽયં સાક્ષાત્કૃતપદદ્વયઃ ।
ત્વત્પાદઘાતસમ્મૃષ્ટઃ હૃતપ્રાણસમીરણઃ ॥ ૯॥

એવં વિધઃ કથં સ્વામિન્ ન મુચ્યેત ભવામ્બુધેઃ ।
અન્યથા કથમન્યેષાં મુક્ત્યાશા ભજતામપિ ॥ ૧૦॥

અદ્ય પ્રભૃતિ નઃ સ્વામિન્ ભૂયાદ્ભક્તિઃ પદાબ્જયોઃ ।
ધર્માર્થકામમોક્ષાણાં ઇયમેવ પ્રસૂર્મમ ॥ ૧૧॥

ઇતિ નીલમેઘસ્તુતિઃ સમાપ્તા ।

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, PSA Easwaran psaeaswaran at gmail.com

.. Nilamegha Stuti ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*